हृदयं याति हृदयाच्च गुदं व्रजेत्।” पद्मवर्णः लोहितवर्णः तत्र शीर्षजो वीसर्पः। शङ्खाख्यो हृदयं याति हृदयाच्च गुदं व्रजेत् एवं वस्तिजो गुदं याति गुदतः हृदयं हृदयाच्छिरो याति इति बोद्धव्यम्। कुकूणकमाह “कुकूणकः३ क्षीरदोषाच्छिशूनामेव वर्त्मनि। जायते सरुजं नेत्रं कण्डूरं प्रस्रवेद्बहु। शिशुः कुर्य्याल्ललाटाक्षिकूटनासाप्रघर्षणम्। शक्तो नार्कप्रभां द्रष्टुं न चाक्ष्युन्मीलनक्षमः।” कुकूणकं (कोथु) इति लोके। अथ तुण्डीगुदपाकमाह। “वातेनाध्मापिता नाभिः सरुजा तुण्डिरुच्यते। बालस्य गुदपाकाख्यो ४व्याधिः पित्तेन जायते।” अहिपूतनमाह। शकृन्मूत्रसमायुक्ते धौते पाने शिशोर्भवेत्। खिन्ने वा स्नाप्यमानस्य कण्डू रक्तकफोद्भवा। कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते। एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्५।” खिन्ने स्वेदिते। अजगल्लीमाह। स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा। कफवातोत्थिता ज्ञेया बालानामजगल्लिका६। ग्रथिता गुम्फितेव मुद्गसन्निभा मुद्गाकृतिः। परिगर्भिकमाह माधः। कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि। कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः। युज्यते कोष्ठवृद्ध्या च तमाहुः परिगर्भिकम्७। रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम्। पिबन्नपीत्यपिशब्दादपिबन्नपि परिगर्भिकः (एँड़ो) इति लोके। परिभवाख्यं परिभवेति नामान्तरम्। अथ दन्तोद्भेदकान् रोगानाह “दन्तोद्भेदः शिशोः सर्वं रोगाणां कारणं स्मृतम्। विशेषात् ज्वरविड्भेदकासच्छर्द्दिशिरोरुजाम्। अभिष्यन्दस्य पोथक्यावीसर्पस्य च जायते”। कारणमित्यन्वयः पोथक्या वर्त्मरोगविशेषस्य।”

**बालव** पु० तिथ्यर्द्धात्मकेषु करणेषु द्वितीये करणे ज्यो० त०।

**बालवायज** न० वैदूर्य्यमणौ त्रिका०।

**बालवाह्य** पु० बालो वाह्यो यस्य। इकक्कटे वनच्छागे हारा०

**बालव्यजन** न० बाला एव व्यजनम्। चामरे हेमच०। ‘कुर्वन्ति बालव्यजनैश्चमर्य्यः’ इति कुमारः। [हेमच०।

**बालसन्ध्याभ** पु० बाल सन्ध्याया इवाभा यस्य। अरुणवर्णे

**बालसूर्य्य** न० बालः सूर्य्यः तद्वर्णोऽस्त्यस्य। १वैदूर्य्यमणौ त्रिका० कर्म०। २अचिरोदिते सूर्य्ये पु०। [शब्दर०।

**बालसूर्य्यक** न० बालसूर्य्य इव कायति कै–क। वैदूर्य्यमणौ

**बालहस्त** पु०बालाः केशा हस्त इव यत्र।१पशूनां लाङ्गूले अमरः। बाल+संघे हस्तादु०। २केशसंघे च पु०।

**बाला** स्त्री० बालाः केशाकाराः पदार्थाः सन्त्यस्य अच्। १नारिकेले २हरिद्रायां ३मल्लिकाभेदे, ४वलये, ५मेध्ये च ६त्रुटौ स्त्री मेदि० ७घृतकुमार्य्यां (वाला) ८गन्धद्रव्यभेदे, शब्दच०। ९अम्बष्ठायां,१०नीलझिण्ट्याम् स्त्री राजनि० ११षोडशवर्षीयायां स्त्रियां १२कन्यायाञ्च “वर्षमाला भवेद् बाला” प्रा०त०उक्तायामेकवर्षीयायां १३गवि स्त्री १४देवीमूर्त्तिभेदे तन्त्रसारः। स्वार्थे क अत इत्त्वम्। बालिका तत्रैव। बालुकायां, पत्रकाहलायां मेदि० कर्णभूषणे (कानवाला) मेदि० एलायां शब्द०।

**बालाकि** पु० बलाकाया अपत्यम् वा० इञ्। “दृप्तबालाकिर्हानूचानो गार्ग्य आस” वृ०उ०उक्ते गार्ग्ये ऋषिभेदे।

**बालाची** स्त्री बालः केशा इवाचितत्वं पुष्पमस्याः पचस्मा० स्त्रियां ङीप्। केशपुष्पोद्दते शब्दच०।

**बालायनि** पुंस्त्री० बालाया अपत्यं तिका० फिञ्। बालाया अपत्ये स्त्रियां ङीप्। [चाणक्य।

**बालार्क** पु० कर्म०। प्रातःकालीनसूर्य्ये “बालार्कसत्वरणं दधि”

**बालि** पु० बाले केशे जातः इञ्। केशे इन्द्रस्कन्नशुक्रजाते वानरभेदे। बालः उत्पत्तिस्थानत्वेनास्त्यस्य इनि। बालिन् तत्रार्थे त्रिका०।

तदुत्पत्तिकथा रामा० उत्तरा० ३७ स० यथा “उत्प्लुत्य तस्मात् स ह्रदादुत्थितः प्लवगः पुनः। तस्मिन्नेव क्षणे राम! स्त्रीत्वं प्राप स वानरः। तद्रूपमद्भुतं दृष्ट्वा त्यजितौ धैर्य्यमात्मनः। ततस्तस्यां सुरेन्द्रेण स्कन्नं शिरसि पातितम्। अनासाद्यैव तां नारीं सन्निवृत्तमथाभवत्। ततः सा वानरपतिं जज्ञे वानरमीश्वरम्। अमोघरेतसस्तस्य वासवस्य महात्मनः। बालेषु पतितं बीजं बाली नाम बभूव ह। भास्करेणापि तस्यां वै कन्दर्पवशवर्त्तिना। बीजं निषिक्तं ग्रीवायां विधानमनुवर्त्तता। ग्रीवायां पतितं बीजं सुग्रीवः समजायत”।

**बालिश** त्रि० बाड–इन् बाडिं वृद्धिं श्यति शो–क डस्य लः। १मूर्खे, २शिशौ च मेदि० ‘बालिशमालि! शयानम्’ उद्भटः। बालाः सन्त्यस्य इनि बाली मूर्द्धा शेतेऽत्र शी–बा० आधारे ड। ३उपधाने न० शब्दमा०।

**बालीश** पु० मूत्रकृच्छ्ररोगे शब्दर०।

**बालिहन्** पु० बालिं बालिनं वा हन्ति हन–क्विप्। रामे बालिहन्त्रादयोऽप्यत्र पु०। तत्कथा रामा० सुन्दराकाण्डे दृश्या।

**बालु** पु० बल–उण्। १एलवालुकनामगन्धद्रव्ये उणादि०।